श्रीमते रामानुजाय नमः

# ॥ श्री सूक्तम् ॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह।

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम्।

अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम्। श्रियं देवीमुपह्वये श्रीर्मादेवी जुषताम्।

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्। पद्मेस्थितां पद्मवर्णां

त्वामिहोपह्वये श्रियम्। चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।

तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे। आदित्यवर्णे तपसोऽधि

जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः। तस्य फलानि तपसानुदन्तु मायान्तरायाश्च

बाह्या अलक्ष्मीः। उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोऽस्मि

राष्ट्रेस्मिन्कीर्तिमृद्धिं ददातु मे॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीर्नाशयाम्यहम्।

अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात्। गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।

ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियम्॥ मनसः काममाकूतिं वाचस्सत्यमशीमहि।

पशूनां रूपमन्नस्य मयि श्रीश्श्रयतां यशः। कर्दमेन प्रजा भूता मयि सम्भव कर्दम।

श्रियं वासय मे कुले मातरं पद्ममालिनीम्। आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।

नि च देवीं मातरं श्रियं वासय मे कुले। आर्द्रां यःकरिणीं यष्टिं पिङ्गलां पद्ममालिनीम्।

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह। आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम्।

सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह। तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।

श्रीमते रामानुजाय नमः

यस्यां॒ हि॑रण्यं॒ प्रभू॑तं॒ गावो॑दा॒स्योश्वा᳚न् वि॒न्देयं॒ पुरु॑षान॒हम्। पद्मप्रिये पद्मिनि प॑द्मह॒स्ते॒

पद्मालये पद्म॑दलायता॒क्षि। विश्वप्रिये विष्णुमनो॑नुकू॒ले त्वत्पा॑द॒पद्मं मयि॒ सन्नि॑धत्स्व।

श्रियै॑ जा॒त श्रिय॒ आनि॑र्या॒य श्रियं॒ वयो॑ जनि॒तृभ्यो॑ दधातु। श्रियं॒ वसा॑ना अमृत॒त्वमाय॒न्

भज॑न्ति स॒द्यस्समि॒धा मि॒दद्यून्॑। श्रिय एवैनं तच्छ्रियामा॑दधा॒ति। सन्ततमृचा वषङ्कृत्यं

सन्धत्तं सन्धीयते प्रज॑या प॒शुभिः॑। य ए॑वं वे॒द।

* ॐ म॒हा॒दे॒व्यै च॑ वि॒द्महे॑ विष्णुप॒त्न्यै च॑ धीमहि। तन्नो॑ लक्ष्मीः प्रचो॒दया᳚त्॥

**॥ इति श्री सूक्तम्॥**